# .. shrItrivikramastotram ..

# ॥ श्रीत्रिविक्रमस्तोत्रम् ॥

## Sanskrit Document Information

Text title : shrItrivikramastotram

File name : shrItrivikramastotram.itx

Location : doc_vishhnu

Author : Vadiraja

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Brihatstotraratnakara 1 newer, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225

Latest update : March 25, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 25, 2017

*sanskritdocuments.org*

# ॥ श्रीत्रिविक्रमस्तोत्रम् ॥

श्रीगणेशाय नमः ॥

विदारितारिसङ्घातं पदाक्रान्तजगत्त्रयम् ।
गदाचक्रधरं धीरं सदा वन्दे त्रिविक्रमम् ॥ १॥

शङ्खाम्भोजकरद्वन्द्वहुङ्काराऽर्दितदानव ।
शङ्काऽऽतङ्कहराहं ते किङ्करोऽस्मि त्रिविक्रम ॥ २॥

क्षमाकरोल्लसच्चक्रं कृपाविपुललोचनम् ।
अपारसुगुणस्तोममुपासे तं त्रिविक्रमम् ॥ ३॥

रमाधराश्लिष्टपार्श्वं समस्तसुरसेवितम् ।
भ्रमादिदोषहरं तं नमामि त्रिविक्रमम् ॥ ४॥

योगादङ्गमजस्राक्षीद्गङ्गामङ्गुष्ठतोऽसृजत् ।
तुङ्गामरचया तुङ्गं तङ्गयामि त्रिविक्रमम् ॥ ५॥

नानालङ्कारभरितं पीनावयवमोहनम् ।
ज्ञानानन्दमयं वन्दे श्रीनाथं तं त्रिविक्रमम् ॥ ६॥

वृन्दारकेन्द्रवन्द्याङ्घ्रिं नन्दितीर्थमुनेः प्रियम् ।
कन्दर्पकोटिलावण्यं तं ध्यायामि त्रिविक्रमम् ॥ ७॥

सुधाकुन्देन्दुधवलमधःकृतचराचरम् ।
उदारमादरद्वन्द्वे त्रिधामानं त्रिविक्रमम् ॥ ८॥

वेदान्तवेदितगुणं बोधप्रदमहर्निशम् ।
आधारं नौमि जगतां श्रीधामानं त्रिविक्रमम् ॥ ९॥

अनुयागेन बलिना मनुना मननेन च ।
दिने दिनेऽर्चितं वन्दे मनसा तं त्रिविक्रमम् ॥ १०॥

सर्पिःपायसनैवेद्यैर्भक्ष्यैश्च विविधैः सदा ।
नृत्यवादित्रगीतैश्च तर्पयामि त्रिविक्रमम् ॥ ११॥

वादिराजेन्द्रवरदं सोदापुरनिवासिनम् ।
मोदप्रदं सदा वन्दे माधवं तं त्रिविक्रमम् ॥ १२॥

धूपैर्गन्धानुलेपैश्च दीपैरपि मनःप्रियैः ।
तापसैः पूजितं वन्दे श्रीपतिं तं त्रिविक्रमम् ॥ १३॥

योऽसौ धवलगङ्गायाः पार्श्वे तिष्ठति सर्वदा ।
देशे देशे च विख्यातमासेवे तं त्रिविक्रमम् ॥ १४॥

अग्रे निधाय श्रीदेवीं पृष्ठे पार्श्वे च सज्जनान् ।
स्वर्गिभिः परितः सेव्या मध्ये भाति त्रिविक्रमः ॥ १५॥

शिलामयै रम्यतमशालावलभिमण्डपैः ।
कलशैश्चोल्लसद्देवालये भाति त्रिविक्रमः ॥ १६॥

यावच्चद्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी ।
तावत्त्रिविक्रमः सोऽयं पूज्यस्तिष्ठतु सज्जनैः ॥ १७॥

इदं स्तोत्रं वादिराजो मुदे सज्जनसन्ततेः ।
व्यधत्त तेन प्रीतोऽस्तु सदा श्रीदस्त्रिविक्रमः ॥ १८॥

इति श्रीवादिराजकृतं त्रिविक्रमस्तोत्रं सम्पूर्णम् ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. shrItrivikramastotram ..
was typeset using XƎLATEX 0.99996
on March 25, 2017

Please send corrections to *sanskrit@cheerful.com*